Shree Somanth Sanskrit University Grantha Series - 3

# Vākyārthajyotiḥ

Issue - 1 Year - 2014-15

Chief-Editor
**Prof. Ark Nath Chaudhary**

Editors
**Dr. Lalitkumar Patel**
**Dr. Janakisharan Aacharya**

**Shree Somanth Sanskrit University - Veraval**

प्रकाशकः -
डॉ. दशरथः जादवः
कुलसचिवः
श्रीसोमनाथसंस्कृतयुनिवर्सिटी
राजेन्द्रभुवन रोड, वेरावलम् - ३६२ २६६
गीर-सोमनाथजनपदम्, गुजरातम्
दूरभाषः - ०२८७६-२४४५३२, फेक्स : २४४४१७
E-mail: sssu.veraval@gmail.com
www.shreesomnathsanskrituniversity.info

समन्वयकः -
डॉ. कार्तिकपण्ड्या
संशोधनाधिकारी
श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

*© Shree Somnath Sanskrit University, 2017*

प्रथमं संस्करणम् - जनवरी - २०१७

प्रतयः - ३५०

ISBN - 978-93-83097-19-7

मूल्यम् - रु. २५०/-

मुद्रकः - जलाराम ग्राफिक्स एन्ड ओफसेट
परमहंस अेपार्टमेन्ट के पास,
होटल कावेरी के पीछे, एस.टी.रोड, वेरावल-३६२ २६६
जि. गीर सोमनाथ, गुजरात (भारत)
दूरभाष : (०२८७६) २२१८६१

# ज्यौतिषशास्त्रे पर्यावरणविज्ञानम्

✍ डॉ. रमेशचन्द्रबाबूलालशुक्लः

आदौ प्रश्नः भवति किन्नाम ज्यौतिषशास्त्रम् किन्नाम पर्यावरणविज्ञानञ्च अतः कथं सिद्ध्यति ज्यौतिषशास्त्रे पर्यावरणविज्ञानम् एतदर्थं आदौ व्याख्यायते किन्नाम ज्यौतिषशास्त्रम्।

(१) "ज्यौतिषां सूर्यादिग्रहाणां बोधकं शास्त्रं ज्यौतिषशास्त्रम्"[१] कथ्यते।

अर्थात् सूर्यादिग्रहाणाम् एवं कालस्य यः बोधं कारयति तत् शास्त्रं ज्यौतिषशास्त्रम् अथवा ज्यौतिषां = समस्तज्योतिष्पिण्डानां यत्र ज्ञानं वर्तते, यः कालस्य विज्ञापकं च वर्तते, तत् ज्यौतिषशास्त्रम् कथ्यते अथवा यत्र समस्तभुवनकोशस्य वर्णनं वर्तते तत् ज्यौतिषशास्त्रं कथ्यते इति।

(२) अस्य ज्यौतिषशास्त्रस्य अष्टादशप्रवर्तकाः सन्ति यथा-

सूर्यः पितमहो व्यासो वशिष्ठोऽत्रिः पराशरः
कश्यपो नारदो गर्गो मरीचिर्मुनिरङ्गिराः ॥
लोमशः पौलिशश्चैवच्यवनो यवनो भृगुः।
सौनकोष्टादशाश्चैते ज्यौतिः शास्त्रप्रवर्तकाः ॥[२]

एवम् अस्य ज्यौतिषशास्त्रस्य अष्टादशप्रवर्तकाः आसन्।

(३) वेदस्य षडङ्गानि सन्ति - (१) शिक्षा, (२) कल्पः, (३) व्याकरणम्, (४) निरुक्तम्, (५) छन्दः, (६) ज्यौतिषम्।

बृहत्संहिताग्रन्थे प्रमाणवाक्यं यथा-

**शब्दशास्त्रं मुखं ज्यौतिषं चक्षुषी**
**श्रोत्रमुक्तं निरुक्तं च कल्पः करौ।**
**यातु शिक्षास्य वेदस्य सा नासिका**
**पादपद्मद्वयं छन्द आद्यैर्बुधैः ॥[३]**

(४) अत्र वेदनेत्ररूपज्यौतिषशास्त्रस्य त्रिस्कन्धा आचार्यैः स्वीकृता आसन्। ग्रन्थप्रमाणं यथा -

**सिद्धान्तसंहिताहोरारूपस्कन्धत्रयात्मकम्।**
**वेदस्य निर्मलं चक्षुः ज्यौतिषशास्त्रमकल्मषम्॥**[४]

(५) एवं त्रिविधष्कन्धानन्तरं पञ्चष्कन्धा अपि आचार्यैः स्वीकृता यथा -

(१) सिद्धान्तः, (२) संहिता, (३) होरा, (४) प्रश्नः, (५) शकुनम् एवं पञ्चाङ्गानामपि ग्रहणं जातम्। इदानीं ज्यौतिषशास्त्रस्य अङ्गद्वयम् एव आचार्यप्रथितम्–

(१) सिद्धान्तज्यौतिषस्कन्धः (२) फलितज्यौतिषस्कन्धः

(६) सिद्धान्तज्यौतिषपक्षे आचार्यभास्कराचार्यैः सिद्धान्तपक्षः कः वर्तते तस्य कथनं स्ववचोभिः कृतं यथा-

**त्रुट्यादिप्रलयान्तकालकलनामानप्रभेदाः क्रमा**
**च्चारश्च द्युसदां द्विधा च ग ' गतं प्रश्नास्तथा सोत्तराः।**
**भूधिष्ण्यग्रहसंस्थितेश्च कथनं यन्त्रादि यत्रोच्यते**
*सिद्धान्तः स उदाहृतोऽत्र गणितस्कन्धप्रबन्धे बुधैः।*[५]

*सिद्धान्तः सः* कथ्यते यत्र त्रुटिकालतः प्रलयान्तकालपर्यन्तं कालस्य गणना भवति। सौरचान्द्रसावननक्षत्रादिमानानां भेदाः प्रतिपादिताः भवन्ति। ग्रहाणां सञ्चारज्ञानप्रकारा अपि भवन्ति। प्रकारद्वयं व्यक्ताव्यक्तगणितं भवति। प्रश्नोत्तराणि भवन्ति। पृथ्वी ग्रह भपञ्जरस्य यन्त्रादिनां वर्णनं भवति सः सिद्धान्तः कथ्यते। यत्र कुत्राऽपि गणितस्कन्धः अपि प्रचलति स्म। गणितस्कन्धे व्यक्ताव्यक्तादिगणितस्य वर्णनं भवति परन्तु विशालसिद्धान्तज्यौतिषस्कन्धस्य अन्तर्गतः सम्पूर्णगणितपक्षः आगच्छति। अतः अन्यत्र अस्य गणितपक्षस्य आवश्यकता न भवति। अतः पक्षद्वयमेव समीचीनं (१) सिद्धांन्तज्यौतिषस्कन्धपक्षः (२) फलितज्यौतिषस्कन्धपक्षः च। इदानीं सिद्धान्तज्यौतिषस्कन्धपक्षः एवं फलितज्यौतिषस्कन्धपक्षः एवं सर्वत्र पक्षद्वयमेव गृहीतं। सर्वत्र प्रचलितं च वर्तते।

(६) सिद्धान्तपक्षाधोरण एव पञ्चाङ्गस्य निर्माणं भवति, यस्याधारेण धर्मशास्त्रपुराणादिस्मृतिवचनस्य सार्थक्यं सिद्ध्यति।

ज्यौतिःशास्त्रफलं पुराणगणकैरादेश इत्युच्यते।
नूनं लग्नबलाश्रितः पुनरयं तत्स्पष्टखेटाश्रयम्॥[६]

पुराणशास्त्रस्य मर्मज्ञैः विद्वद्भिः ज्यौतिषशास्त्रस्य फलानि आदेशरूपेण स्वीक्रियन्ते। आदेशोऽयं स्पष्टग्रहद्वारा संसाधितसम्मिलितलग्नोपरि आधारितं च वर्तते। अतः स्पष्टग्रहा अस्य शास्त्रस्य मूलाधाराः वर्तन्ते। अतः परं फलितपक्षः व्याख्यायते यथा-

फलितस्कन्धस्य मुख्याः पञ्चविभागाः सन्ति यथा-

(१) जातकम् (२) ताजिकम् (३) मुहूर्तः (४) प्रश्नः (५) संहिता च।

यत्र जन्मकालद्वारा प्राणिनां जीवनसम्बन्धितसमस्तविचारोपयोगिफलं कथितं वर्तते तत् शास्त्रम् जातकशास्त्रं कथ्यते। वस्तुतः जन्मकालस्य ज्ञानं विना प्राणिनां जीवनम् अन्धकारमयं भवति। अतः कथितं वर्तते यथा -

(१) यस्य नास्ति किल जन्मपत्रिका या शुभाशुभफलप्रदायिनी।
अन्धकं भवति तस्य जीवितं दीपहीनमिव मन्दिरं निशि॥[७]

(२) यदुपचितमन्यजन्मनि कर्मणा पंक्तिः।
व्यञ्जयति शास्त्रमेतत् तमसि द्रव्याणि दीप इव॥[८]

(८) अतः परं ताजिकविभागः व्याख्यायते यथा-

ताजिकविभागतः वर्षफलमासफलादीनां ज्ञानं भवति। पूर्वापरसन्दर्भं पश्यामि चेत् निश्चितं भवति यत् यवनैः अपि ज्यौतिषशास्त्रस्य अध्ययनं कृतम् आसीत्। अतः ज्यौतिषशास्त्रप्रवर्तकेषु यवनाचार्याणामपि नामानि सन्ति। पूर्वकाले अत्र दैवज्ञानां वर्षफलादीनां निर्माणरीतिः भिन्ना आसीत्। नीलकण्ठाचार्यैः ताजिकशास्त्रस्य अध्ययनं कृत्वा ताजिकनीलकण्ठीनामकग्रन्थस्य निर्माणं कृतम्, ग्रन्थेऽस्मिन् योगानां नामानि फारसीभाषायां दृश्यन्ते यथा इक्कबालद्वारादीनि। एषां शब्दानां परिवर्तनं संस्कृतभाषायां न कृतम् अतः पूर्वं वैदुष्यपरम्परायां गुणग्राहकता अत्याधिका आसीत्।

अतः परं मुहूर्तविभागाः व्याख्यायन्ते -

मुहूर्तविभागेऽस्मिन् गर्भाधानमुहूर्ततः समस्तषोडशसंस्काराणां मुहूर्तवर्णनं कृतं वर्तते। यथा - जातकर्म, अन्नप्राशनादिसफलमुहूर्तानां वर्णनं वर्तते। प्रमाणश्लोकं

यथा-

गर्भाधानमतश्च पुंसवनकं सीमन्तजाताभिषे।
नामाख्यं सह निष्क्रमेण च तथाऽन्नप्राशनं कर्म च।
चूडाख्यो व्रतबन्धकोऽप्यथ चतुर्वेदव्रतानां पुनः।
केशान्तं सविसर्गकः परिणयः स्यात् षोडशी कर्मणाम्॥
ब्राह्मणक्षत्रियविट्शूद्राणामाद्यस्त्रयो द्विजाः॥[९]

फलश्रुतिः- निषेकादिश्मशानान्तास्तेषां वै मन्त्रिताः क्रियाः।
शूद्रोप्येवंविधः विना मन्त्रेण संस्कृतः।
स्त्रीणां चौलान्तसंस्कारानुप्रकुर्वीत ह्यमन्त्रकाद्।
पुंस्त्रियोरुभयोरत्नविवाहः स्याद्यथाविधि॥[१०]

अर्थात् ब्राह्मणक्षत्रियविट्शूद्राणां मध्ये ब्राह्मणक्षत्रियवैश्याः, एते त्रयो द्विजाः, एतेषां या क्रिया भवति सा क्रिया समन्त्रकी भवति। शूद्राणां मन्त्ररहिता उक्ता वर्तते परन्तु अत्र क्वचित् समाजाय विसङ्गतिः वर्तते, अतः स्वविचारपूर्वकं सुसङ्गतिः कर्तव्या।

(९) अतः परं प्रश्नविभागः व्याख्यायते यथा-

प्रश्नविभागे मूकप्रश्नः, जयपराजयप्रश्नः, दृष्टिफलादिविविधप्रश्नानां विचाराः प्रतिपादिताः सन्ति। यथा दृष्टिविचारः-

ऊर्ध्वदृष्ट्या भवेज्जीवः अधो दृष्ट्या च मूलकम्।
समदृष्ट्या भवेत् धातुर्मूलदेवेन भाषितम्।[११]

प्रष्टा = प्रश्नकर्तुः दृष्टिः यदि उपरि भवति चेत् जीवसम्बन्धी प्रश्नः भवति। यदि पृच्छकस्य दृष्टिः अधो भवति तदा मूलसम्बन्धिप्रश्नः भवति। एवं प्रष्टुः समदृष्टिः चेत् धातुसम्बन्धीनी चिन्ता भवति एवं विविधविचाराः सन्ति।

(१०) संहिताभागेविचाराः-

ज्यौतिषशास्त्रस्य अनुपमग्रन्थः बृहत्संहिता वर्तते यत्र (१) सांवत्सरसूत्राध्यायः, (२) आदित्यादिनवग्रहचाराध्यायाः इत्यादि सप्ताधिकशततमोअध्यायाः सन्ति तेषु पर्यावरणदृष्ट्या वयम् पश्यामः चेत् वृक्षायुर्वेदाध्यायः, वनकुसुमलताध्यायः, वन-सम्प्रवेशणाध्यायः, वास्तुविद्याध्यायः, दकार्गलाध्यायानां समाजे पर्यावरणदृष्ट्या महत्वपूर्णं योगदानं वर्तते। यस्याधारेण वैज्ञानिका अपि अग्रेसराः भवन्ति। अतः परं

व्याख्यायते पर्यावरणविज्ञानं यथा-

परितः आवरणम् इति पर्यावरणम्। विशिष्टं ज्ञानं विज्ञानम्। अतः पूर्वोक्तज्यौतिषशास्त्रे पर्यावरणविज्ञानम् इति कथं सिद्ध्यति?

सूत्रं यथा - परितः आवरणम् इति पर्यावरणम्। अतः चतुर्दिक्षु येषां प्रभावः मानवानामुपरि वा येषां केषाम् उपरि भवति तद् पर्यावरणप्रभाव एव पर्यावरणं कथ्यते॥

अतः पृथिव्योपरि मानवाः तिष्ठन्ति। तस्य चतुर्दिक्षु पर्यावरणस्वरूपाः वृक्षाः भवन्ति। किं वृक्षाः एव पर्यावरणं ? न, मानवानां चतुर्दिक्षु येषां प्रभावः भवति तत् एव पर्यावरणम्। तदा किं ग्रहा अपि पर्यावरणम् ? तेषां प्रभावः मानवानामुपरि चतुर्दिशातः भवति, अतः ग्रहा अपि पर्यावरणम्। नक्षत्रराशयः अपि पर्यावरणम्। सम्पूर्णभपञ्जर-ब्रह्माण्डमेव पर्यावरणं वर्तते।

अतः ग्रहाणां प्रभावः कथं भवति यथा प्रत्यक्षप्रमाणं सूर्यस्य चन्द्रस्यवा प्रत्यक्षरूपेण दृश्यते तथैव अन्येषां ग्रहाणामपि प्रभावाः भवन्ति यथा शक्तिः तथैव प्रभावा अपि वर्तन्ते। शरीरे पञ्च तत्त्वानि सन्ति, तथैव अस्मिन् ब्रह्माण्डे अपि पञ्च तत्त्वानि सन्ति।

(१) क्षितिः, जलम्, पावकः, गगनम्, समीरः, पर्यावरणेऽपि पञ्च तत्त्वानि सन्ति अतः सर्वत्र पञ्च तत्त्वानां प्रभावः वर्तते। अतः पञ्च तत्त्वस्य रक्षणं शुद्धीकरणमेव पर्यावरणस्य रक्षणं वर्तते। ज्यौतिषशास्त्रस्य बृहद्वास्तुमालाग्रन्थे उक्तं वर्तते यत्-

**ब्राह्मणी भूः कुशोपेता क्षत्रिया स्याच्छराकुला।**
**कुशकाशा कुला वैश्या शूद्रा सर्वतृणाकुला॥**[१२]

कुशा युक्ता भूमिः ब्राह्मणी तथा शर=मूंजयुक्ता भूमिः क्षत्रिया, कुशकाशादियुक्ता भूमिः वैश्या एवं सर्वतृणयुक्ता भूमिः शूद्रा कथ्यते उक्तं यथा-

**ब्राह्मणी सर्वसुखदा क्षत्रिया राज्यदा भवेत्।**
**धनधान्यकरी वैश्या शूद्रा तु निन्दिता स्मृता॥**[१३]

अतः भूमिनिर्धारणे अपि पर्यावरणस्य महत्त्वं वर्तते।

निवासस्थानं मङ्गलमयशुभकरणार्थं पर्यावरणशुद्ध्यर्थं गृहस्य चतुर्दिक्वृक्षाणां रोपणस्य लिखितप्रमाणं सर्वत्रज्यौतिषशास्त्रस्य वास्तुप्रकरणे आगतमस्ति। वृक्षारोपणप्रसङ्गे प्रथमत इदं ध्यातव्यं भवति यत् गृहस्य मध्यभागे तुलसीवृक्षमतिरिच्य

अन्यवृक्षस्य रोपणं न भवति। उक्तं यथा वास्तुप्रबोधे-

**यदि स्वर्णमयं वृक्षं गृहमध्ये न रोपयेत्।**
**अजिरे तुलसीवृक्षं रोपयेदघनाशनम्।।**[१४]

गृहात् बहिः दीर्घवृक्षाणां रोपणं भवति तेषां दिशानिर्धारणमपि वर्तते यथा-

**उदगादिषु प्रशस्ताः प्लक्षवटोदुम्बराश्वत्थाः।।**[१५]

अर्थात् - उत्तरदिशायां प्लक्षः (पाकड्वृक्षः) एवं पूर्वदिशायां वटवृक्षः, दक्षिणदिशायां औदुम्बर=गूलरवृक्षः तथा पश्चिमदिशायाम् अश्वत्थः=पीपलवृक्षस्य रोपणं शुभं भवति। तथैव वास्तुसौख्यग्रन्थे उक्तं यथा चम्पा, गुलाब, केतकी, मालती, मल्लिकादि पुष्पवृक्षाः गृहे प्रशस्ताः भवन्ति। एवमेव बिल्व, अनार, नागकेशर, पंसः(कटहल), नारिकेलनिम्बादिवृक्षा अपि प्रशस्ताः भवन्ति।

ग्रन्थप्रमाणं यथा-

**यत्र तत्र स्थिताः वृक्षाः विल्वदाडिमकेसराः।**
**पनसो नारिकेलश्च शुभं कुर्वन्ति नित्यशः।।**[१६]

गृहसमीपे निषिद्धवृक्षाः यथा कण्टकयुक्तवृक्षाः भवन्ति चेत् शत्रुभयं कुर्वन्ति। सदुग्धवृक्षः धनं नाशयति फलयुक्तवृक्षाः सन्ततिं नाशयन्ति। अत एवं ये वृक्षाः निषिद्धाः सन्ति, तेषां गृहस्य समीपे रोपणं शस्तं न भवति। गृहस्य उपरि वृक्षाणां छाया अपि निषिद्धा वर्तते। एवमेव ग्रहाणामपि वृक्षाः सन्ति। नक्षत्राणामपि वृक्षाः सन्ति राशिणामपि वृक्षाः सन्ति। येषां दर्शनेन, स्पर्शनेन, नमस्कारेण, अर्चनेन, वन्दनेन ग्रहनक्षत्रराशिणाम् अनिष्टप्रभावाः नश्यन्ति, तेषां परिचयो यथा-

सूर्यग्रहस्य वृक्षः मन्दारः, चन्द्रग्रहस्य वृक्षः पलाशः, भौमग्रहस्य वृक्षः खदिरः, बुधग्रहस्य वृक्षः अपामार्गः, गुरुग्रहस्य वृक्षः पिप्पलः, शुक्रग्रहस्य वृक्षः औदुम्बरः, शनैश्चरस्य वृक्षः शमी, राहोः वृक्षः दुर्वा, केतोः वृक्षः कुशा च वर्तते। सूर्यादिग्रहाणां सम्बन्धः अनेन वृक्षेण सह भवति।

प्रमाणश्लोकं यथा-

**अर्कः पलाशः खदिरः अपामार्गोऽथ पिप्पलः।**
**औदुम्बरशमीदुर्वाकुशाश्च समिधाः क्रमात्।।**[१७]

एवं शास्त्रसम्मतं ज्यौतिषशास्त्रे पर्यावरणविज्ञानं वर्तते।

देवान् समस्तान् प्रणिपत्य भूयो
ग्रहान् समस्तान् स्वसहायकांश्च ।
लघुप्रबन्धं ह्युपसंहरन्तं
श्रीसोमनाथाय समर्पयामि ।[१८]

***

## पादटिप्पणयः

(१) भारतीयज्यौतिषशास्त्रेतिहासः, प्रथमोऽध्यायः - पृष्ठ १ ।

(२) गणकतरङ्गिणी, म.म.पं. सुधाकर द्विवेदी ।

(३) सि. शि. म. कालमानाध्यायः, श्लोकः - १० ।

(४) नारदसंहिता - १/४ ।

(५) सि. शि. म. कालमानाध्यायः, श्लोकः - ६ ।

(६) भारतीयकुण्डलीविज्ञानं, कुण्डलीविधानप्रकरणं, श्लोकः १ ।

(७) सरलजन्मपत्नीविज्ञान, श्लोकः ४ ।

(८) लघुजातकं राशिबलाध्यायः श्लोकः - ३ ।

(९) हृषीकेशपञ्चाङ्गम् - पृष्ठ ५ ।

(१०) हृषीकेशपञ्चाङ्गम् - पृष्ठ ५ ।

(११) केरलप्रश्नसंग्रहः, पूर्वार्द्धं - श्लोकः २४ ।

(१२) बृहद्वास्तुमाला - पृष्ठ ९, श्लोकः २९ ।

(१३) बृ. वा. मा., पृष्ठ ९, श्लोकः ३० ।

(१४) वास्तुप्रबोधः ।

(१५) बृहत्संहिता वास्तुविद्याध्यायः, श्लोकः ८५ ।

(१६) वास्तुसौख्यम्, तृतीयभागः, श्लोकः ३४ ।

(१७) हृषीकेशपञ्चाङ्गम्, पृष्ठ ९ ।

(१८) स्वरचितम् ।

***